शृङ्गेरी-द्वारका-पुरी-ज्योतिष्पीठाचार्य-स्वीकृता शासन-संमता विश्वप्रिया पाक्षिक-पत्रिका

शारदा


संपादकः यं वसन्त अ. गाडगीळ.




माता रुद्राणां दुहिता वसूनां स्वसादित्यानाम् अमृतस्य नाभिः ।

पुणे-डेरवण, (चिपळूण) ❁ यज्ञ-महोत्सव-विशेषाङ्क-दैनिकम् – १ ❁ वर्षम् २६ अङ्कः ३ वार्षिक मूल्यं रू. २५ अस्य अङ्कस्य १-२५

भारतीय - सौर - दिनाङ्कः ४ पौष १९०६ विक्रम-संवत् २०४१ मङ्गलवासरः २५ डिसेम्बर १९८४





श्रीशिव-समर्थ-मन्दिरे विराजमानं पूर्णाकृति-प्रतिमाद्वयम् — १ गजलक्ष्मी-स्वागतम् २ राष्ट्रगुरुः समर्थः श्रीरामदासः । एतदधिकं प्रत्यक्षम् ।

॥ अभूत-पूर्वं विराट् याग-धर्मानुष्ठानम् ॥

डेरवण (चिपळूण-महाराष्ट्र) दि. २५ डिसेम्बर १९८४ —

अद्य प्रातः परम-मङ्गल-मुहूर्ते महाराष्ट्र-देशे, नहि नहि जगतीतले, 'एकम् एव अद्वितीयम्' इति सुप्रसिद्धे अत्रत्ये श्रीशिव-समर्थ-मन्दिरे —

॥ ॐ वरदमूर्ति-श्रीमन्महागणाधिपतये नमः ॥

— इति स्वस्ति - मङ्गलेन, पुण्याहवाचन - पुरःसरं प्रारभ्यते अभूतपूर्वं विराट् - स्वरूपं याग - धर्मानुष्ठानं सर्वारिष्ट - निरसन - पूर्वक - विश्व-कल्याणार्थम् ।

'अग्निमीळे पुरोहितम् . . .' इति ऋक्संहिता - स्वाहाकारेण सहैव श्रीगणपति-शिव-हरि-जगदम्बा-भास्कर - देवता - पञ्चक - नाम्ना लक्ष-(मोदक)-गणेश - यागः, अतिरुद्र - स्वाहाकारः, विष्णु-यागः, सौर-यागः, श्रीसूक्त-देवीसूक्त - याग-सहिता अयुतचण्डी, भागवत-दशम-स्कन्ध-हवनं, रामायण-सुन्दरकाण्ड-हवनम् इत्यादिकं भव्यं यज्ञधर्मानुष्ठानं सुफलयितुं भारतवर्षस्य सर्वेभ्यः प्रदेशेभ्यः सहस्राधिक-वैदिक-याज्ञिक-शास्त्रि-पण्डित-पुरोहिताः श्रीपरशुराम-भूमिं प्राप्ताः सन्ति गते दिने । तान् सर्वान् सु-निपुणं परीक्ष्य धर्म - शास्त्र - विशारदेन यागाचार्य श्री. सप्रे लक्ष्मणभट्ट-सहितेन ऋग्वेदघनपाठि-वैदिकोत्तमेन श्री. किंजवडेकर दत्तभट्ट-महाभागेन ते सर्वे स्वीये स्वीये कर्मानुष्ठाने अद्य प्रातः पाठे हवने वा कर्मणि नियोक्ष्यन्ते ।

प्रतिदिनं यज्ञ - महोत्सव-वृत्तं भारते विदेशेषु च सर्वत्र प्रसारयितुं संस्कृत-पत्र-व्रत-दीक्षितैः 'शा र दा'-कारैः पण्डित गाडगीळ वसन्तरायैः प्रबन्ध - संपादिकया श्रीमती अर्जुनवाडकर सुधा इत्यनया सह श्रीपरशु-रामक्षेत्रं समागत्य प्रारब्धं यागदिनेषु सर्वेषु संकल्पितं 'शारदा'-दैनिक-प्रकाशनम् ।

यज्ञानुष्ठानमन्दिरेण सहैव द्वि-सहस्र-जनानां यज्ञोत्सवे सहभागिनां सौकर्यार्थं शतशः स्वच्छता - स्नान-गृहाणां, भोजन - महामण्डप - द्वयस्य पाकशालायाः अतिथि-निवास - बृहन्मण्डपस्य च निर्माणं यज्ञ-महोत्सव-प्रवर्तक-पू. श्रीदिगम्बरदासमहाराज-कठोर-निरीक्षकत्वे शत-शत-कर्मकरैः कार्यकर्तृभिश्च अविश्रान्त-परिश्रमैः परिपूर्णतां नीतम् ।

अष्ट-दिवसावधि - यज्ञ-धर्म - महोत्सवे अस्मिन् लक्षशः धार्मिकाः दर्शनाय प्रसादाशीर्वाद-स्वीकाराय च 'डेरवण'ग्रामं प्राप्स्यन्ति इति कार्य-कर्तृभिः शासनेन च सर्वम् अपि रक्षणानुशासनं सुस्थिरीकृतम् । नूतने क्रिस्त-वर्षारम्भे १ जानेवारी १९८५ दिने मङ्गलादि मङ्गलमध्यं मङ्गलान्तम् इदं धर्मकार्यं सर्वेषां मङ्गल-प्रदं सुफलं संपन्नं भविष्यति । इति वार्ताः ।

शृङ्गेरी-द्वारका-ज्योतिष्पीठाचार्य-स्वीकृता शासन-पुरस्कृता विश्वप्रिया

शारदा

संपादकः वत्सल्य अ. गाडगीळ

वर्षम् २६ अङ्कः ३ सौर ४ पौष १९०६ २५ डिसेम्बर १९८४

वार्षिकं मूल्यम् रू. २५ ॥ अस्य अङ्कस्य रू. १-२५

धर्मो विश्वस्य जगतः प्रतिष्ठा ।

"धर्म एव हतो हन्ति । धर्मो रक्षति रक्षितः ॥" इति सुभाषितम् अनादृत्य यदा केचित केनचन धर्म-मतेन, संप्रदायेन, धर्म-विषयक-भ्रान्त-कल्पना-ग्रस्तैः साकं योद्धुं प्रवर्तन्ते तदा नैव तस्य धर्मस्य रक्षा भवति न वा धर्म-विरोधे स्थितस्य तस्य भ्रान्तस्य ।

नचिरम् एव शिख (सिक्ख) संप्रदाय-भ्रान्त-विरोधे भारत-शासनेन तेषां संप्रदाय-केन्द्रे अमृतसरे सेना-बलं समाश्रित्य योद्धव्यम् अनिवार्य सिद्धम् । सहस्रशः सैनिकाः संगरे तस्मिन् निहताः सिक्ख - संप्रदायस्य अतिरेकिभिः । इयं राष्ट्रस्य महती हानिः । परम् अगतिकस्य शासनस्य कृते तत्र सेना-प्रेषणं विना गत्यन्तरम् एव नावशिष्टम् ।

'किं विषदग्धम् अमृतसरः?' (वर्ष २५ अङ्कः ७ शारदा ७ जुलै ८४) इति स्वीये संपादकीये 'शारदा'-कारैः स्वीयं मानसं स्फुटीकृतम् आसीत् 'अमृतसर'स्थ - दुर्घटना - विषये । नरकासुर-कथा तत्र स्मारिता । परम् अयं नरकासुरः महामात्या-सदने भक्षकः सिद्धः तदा अयं नैव नरकासुरः परम् भस्मासुरः इति सर्वैः साक्षात्कृतम् ।

'दया धर्मस्य मूलम् ।' इति सत्यम् एव । परं यदि सा दया 'देशे, काले च पात्रे च' नैव स्यात् तदा? आत्मघाताय प्रवर्तते इति महामात्या प्रियदर्शिनी-घातोत्तरम् अवबोधि अयं भारत-शासनेन । महामात्या स्वीय सिक्खम् अङ्ग-रक्षकम् अस्थाने दयया यद् अनुगृहीतवती तेनैव तस्याः रक्षा-स्थाने घातः समभवत् । अतः —

न विश्वसेद् अविश्वस्ते विश्वस्ते नातिविश्वसेत् । इत्यपि शिवराज-नीतिः संस्मरणीया ।

राजनीतिर्महालक्ष्मीः धर्मो नारायणः स्वयम ।

अन्यच्च, भारतं धर्मक्षेत्रम् । धर्म - संगता, धर्म-मूला, धर्म-वरिष्ठा राजनीतिः सर्वत्र विजयिनी भवति । धर्माग्रह-रहितं भारतस्य राजनीति-शासनम् इति (सेक्युलर स्टेट) कामं ठणठणन्तु धर्म - विरोधिनः सर्वे ते बुद्धिवादिनः । भारतीया राजनीतिः श्रीमहालक्ष्मी - स्वरूपा धर्म - पूर्वम् एव आदिशति न तु धर्म - विध्वंसनं धर्म - शून्यतां धर्माग्रह-द्वेषं वा । यतः 'धर्मः स्वयं नारायणः ।' तम् अनादृत्य ये प्रवर्तन्ते ते स्वीयं घातम् एव प्राप्नुवन्ति । जगतीतले 'धर्म'-विरुद्धस्य न कदापि शाश्वतं सुखं शाश्वतः विजयः वा । ये धर्मानुचरणे, धर्म-रक्षणे वा बद्धादराः तेषाम् एव सदैव शाश्वतः विजयः । सत्यम् एव जयते, नानृतम् । तत सत्य धर्मः । अयं धर्मः रक्षितः रक्षकं रक्षति ।

अतः सर्वैः मानव्य-धर्म-शास्त्र-रक्षा-चिन्ता-परैः मानव्यस्य सर्वविध कल्याणं साधनीयं चेत् स्वप्नेऽपि धर्म-विरोधे न वर्तनीयं, धर्म विरुद्धं न वा चिन्तनीयम् अपि । यतः 'धारणा'रूपः अयं धर्मः न केवलं धार्मिकस्य विश्वस्य, न वा कस्यचन विशिष्टस्य भूभागस्य संप्रदायस्य, समूहस्य वा परं सर्वेषां कृते श्रेयःप्रदः सिद्धः । तस्मात् सर्वे धर्म - विषये बद्धादराः, धर्म-मार्गेण एव स्वीयां जीवनक्रमणां कर्तुं दृढव्रताः बद्ध-प्रतिज्ञाः सन्तु ।

नूतनः भारत-महामात्यः श्री. राजीव गान्धी सर्वे विविध-पक्षाव-लम्बिनश्च निर्वाचन-संगरे परस्परं योद्धुं प्रवृत्ताः संप्रति साक्षात्-क्रियन्ते । तेषां सर्वेषां विषये सादरम् एतावदेव निवेदयितुम् इच्छामः । यः कश्चन

(अग्रिमे तृतीये पृष्ठे)

अगतिकाः स्मः । क्षन्तव्याः वयम् । कर्गज - मुद्रणसाहित्य - मूल्यवर्धनात् नूतने षड्विंशति-(२६)-तमे (१ नोव्हेम्बर १९८४) शारदीये वर्षे

शा र दा - मू ल्य - व र्ध न म् ।

मूल्यम्	भारतवर्षे रूप्यकाणि	विदेशेषु अमेरिकन डॉलर
वार्षिकम्	२५	१०
पञ्चवार्षिकम्	१२१	५०
यावज्जीवम्	५०१	२००

धर्म हाच सर्व जगाचा आधार

धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः । या सुभाषिताचा अनादर करून जेव्हा कोणी धर्म - मतावरोबर, संप्रदायाबरोबर, धर्मविषयक वेडगळ कल्पना असणाऱ्यासह लढू लागतात तेव्हा न घड त्या धर्माचे रक्षण होते, न त्या धर्माच्या विरुद्ध उभे ठाकलेल्या वेडगळाचे.

कांही दिवसापूर्वी भारत शासनाला शीख संप्रदायाच्या केंद्रस्थानी अमृतसरला त्या वेडगळाविरुद्ध सेना पाठवून लढणे अपरिहार्य झाले. हजारानी सैनिक त्या ठिकाणी शीख अतिरेक्यानीं ठार मारले. ही फार मोठी राष्ट्रीय हानीच झाली. परन्तु अगतिक शासनाला तिथे सेना पाठविण्याखेरीज दुसरा मार्गच नव्हता.

'काय अमृताचे सरोवर विषाने जाळले?' या स्वतःच्या अग्रलेखात शारदाकाराने अमृतसरच्या दुर्घटनेविषयी आपले मनोगत स्पष्ट केलेच होते. (शारदा वर्ष २५, अंक ७ – ७ जुलै १९८४) त्यावेळी नरकासुर कथा आठवली. परंतु हा नरकासुर नव्हे, भस्मासुर ठरला हे सर्वांना माहीतच आहे.

'दया धरमका मूल है । हे तर खरेच, पण तीच दया जर अस्थानी, अकाली आणि अपात्राच्या ठिकाणी केली तर? तर ती आत्मघात करते एवढा तरी घडा महामात्या प्रियदर्शिनीच्या घातानंतर भारताने शिकायला हवा. महामात्या इंदिराजीनी स्वतःच्या शीख अंगरक्षकावर(अस्थानी) दया केली त्यामुळेच त्यांचा घात झाला. म्हणूनच — अविश्वसनीयावर भरंवसा ठेवू नये. आणि विश्वसनीयावरहि अति भरवसा ठेवू नये. या शिवाजी महाराजांच्या नीतीचे सदा स्मरण ठेवावे.

दुसरे म्हणजे भारत ही धर्मभूमी आहे. धर्माचे महत्व मानणारी राजनीतीच सर्वत्र विजयी होते. भारत सरकार हे सेक्युलर(निधर्मी) असा ठणठणाट धर्मविरोधक बुद्धिवादी खुशाल करोत. भारतीय राजनीती ही श्रीमहालक्ष्मी - स्वरूप असून ती धर्माचा आदर राखा म्हणून सांगते, धर्माचा विध्वंस, धर्माची पोकळी, धर्माचा आग्रह धरणाऱ्यांचा द्वेष नव्हे. धर्माचा अनादर करून जे चालतात ते स्वतःचा घातच करून घेतात जगाच्या पाठीवर धर्माच्या विरोधी जाणाऱ्याला केव्हांही शाश्वत सुख: किंवा शाश्वत विजय लाभत नाही. जे धर्माचरणी असतात धर्मरक्षणाबाबत तत्पर असतात त्यांचाच सदैव शाश्वत विजय होतो. सत्य हेच विजयी ठरते. ते सत्य म्हणजेच धर्म. हा धर्म त्याचे रक्षण केल्यास आपले रक्षण करतो. म्हणूनच सर्व मानव्य धर्माचा शास्त्राचा चिन्ता असणाऱ्यानी मानवतेचे सर्वप्रकारचे कल्याण साधायचे असेल तर स्वप्नात सुद्धा धर्माच्या विरोधी वर्तन करू नये, तसे मनांतसुद्धा आणू नये. कारण हा धारणा स्वरूप असणारा धर्म केवळ धार्मिक जगाचे, एखाद्या भूभागाचे, संप्रदायाचे किंवा समाजाचेच नव्हे तर सर्वांचे कल्याण करणारा श्रेयस्कर उरला आहे. म्हणून सर्वानी धर्मावद्दल आदर बाळगून धर्ममार्गानेच जगण्याचे दृढ व्रत घेतले पाहिजे. तशी प्रतिज्ञा केली पाहिजे.

भारताचे नवे पंतप्रधान श्री. राजीव गांधी आणि विविध पक्षांचे लोक सध्याच्या निवडणुकीच्या रणधुमाळीत एकमेकासमोर लढायला उभे असलेले आढळतात त्या सर्वांवद्दल आदर बाळगूनहि एवढेच सांगू इच्छितो की, जो कोणी धर्मावद्दल आदर बाळगणारा धर्मप्रधान राजनीतीनें चाला-

(पान ३ पहा)

(द्वितीय-पृष्ठात्)

धर्मम् आदृत्य राजनीति तादृशीं धर्म - प्रधानां स्वीकर्तुं सिद्धः तस्मै एव मतं देयम् । धर्म - विरोधे स्थितः यः कोऽपि भवतु सः धर्मशत्रुः ।

(खलानां कण्टकानां च द्विविधैव प्रतिक्रिया ।)
उपानन्मुखभङ्गो वा दूरतो वा विसर्जनम् ।।

— इति मन्तव्यम् ।

संस्कृत-विरोधेन न कदापि धर्म - ज्ञानं धर्म - रक्षणं धर्म - हितं वा संभवति । अतः निर्वाचन - संगरेच्छुः कोणे बद्ध्वा प्रष्टव्यः 'किं भवान् संस्कृत-हित-रक्षकः ? यदि ॐ तिष्ठ । अन्यथा दूरम् अपसर । स्नातव्यं स्यात् तव दर्शनेन । माऽस्तु ते मुखदर्शनम् । यः संस्कृत-शत्रुः सः धर्मशत्रुः मन्तव्यः । यतः संस्कृतम् आश्रित्यैव धर्मस्य मूलोत्पत्तिः स्थितिश्च । संस्कृत-विरोधेन सर्व-नाशः । धर्म-शत्रुता च । अतः —

धर्मे मतिर्भवतु वः सततोत्थितानाम् । न कदापि केनापि विस्मर्तव्यं परम् अहर्निशम् आ-चरम-श्वासं संस्मर्तव्यं यत् —

धर्मो विश्वस्य जगतः प्रतिष्ठा ।।

यला सिद्ध असेल त्यालाच आपले मत द्यावे. धर्माच्या विरोधी असणारा कोणीहि असो, तो धर्माचा शत्रु, देशाचा शत्रू आहे. दुष्ट आणि काटे यांच्या प्रतिकाराचे दोनच उपाय, त्याना हाणावे किंवा दूर फेकून द्यावे.

• संस्कृतला विरोध करून केव्हाहि धर्माचे ज्ञान, त्याचे रक्षण होणार नाही. धर्म - हितहि साधणार नाही. म्हणून निवडणुकीसाठी उभा असलेला उमेदवार समोर आला तर त्याला कोपऱ्यात बांधल्यासारखा जाब विचारावा, "आपण संस्कृतच्या हिताचे धोरण मानणार का ? होकार असेल तरच थांबा. नाहीतर रस्ता धरा. तुमच्या दर्शनानें आंघोळ करावी लागेल. तुमचे तोंड पहाणे नको. जो संस्कृत-शत्रू तो धर्म-शत्रू मानावा. कारण संस्कृत हेच धर्माचे मूल-स्थान. संस्कृतनेच धर्माची धारणा. संस्कृतच्या विरोधानें सर्वनाश. संस्कृतशी शत्रुत्व हे धर्माशी शत्रुत्व. म्हणूनच सतत जागृत रहा. धर्माच्या ठायी स्थिरबुद्धी ठेवा. धर्मावर अढळ निष्ठा ठेवा. कोणीहि केव्हाहि विसरू नये परंतु सतत रात्रंदिवस, अखेरच्या श्वासापर्यंत पक्के लक्षात ठेवावे कि, —

धर्म हाच सर्व जगाचा भक्कम आधार आहे.

पत्र-रत्न-मञ्जूषा —

अमेरिका-वृत्तम्

बन्धुप्रेमनगरी ।। श्री ।। दि. १८-१०-८४

सौ. शालिनी-श्रीधर प. मराठे, कल्पद्रुम, सदाशिव, पुणे ३०.

सादरं नमो नमः ।

पुण्यपत्तने मुद्रणादि - सर्वं कार्यजातं यावदधिकं समाप्ततां नीत्वा (नैव संपूर्णं समापनं शक्यसंभवम् आसीत्) गुरुवासरे ११-१०-८४ अपराह्णे ३ वादनसमये (डे. एक्स्प्रेस ३-१०) पुण्यपत्तन-रेलस्थानकं प्राप्तः। तत्र सर्वेश्री प. भ. कुलकर्णी, ह. मो. मराठे, भगिनी सौ. अमृता मराठे इत्यादि-सर्वे शुभास्ते पन्थानः कर्तुं समुपस्थिताः आसन् । समातृकः गिरीशः तथा सुधा इति सहप्रवासिनः ।

सायं ६-५० समये ठाणे-स्थानके अवतीर्य 'गोल्डन पॅलेस' - नामके त्रि-ताराङ्किते हॉटेल-सभागृहे समुपस्थितिः सर्वेषां विश्व-सम्मेलन-जिगमिषूणां सम्मेलनार्थम् आवृच्छा - (सेण्ड् ऑफ) - समारोहार्थं च । यावत् लोकसत्ताकारः माधवरायः गडकरी नैव उपस्थितः तावत्कालम् आध्यक्ष्य मण्डयितुं म. म. पोतदारवत् सदैव समुत्सुकः सिद्धः श्री. भि. वेलणकरः । डॉ. पराञ्जपे विनायकशास्त्री अपि नागपुरतः समागतः । महता आनन्देन संपन्नं सम्मेलनं भोजनान्तम् । रात्रौ १०-१५ समये बस - यानेन सहार-विमान-पत्तनम् । ११-०० समये पत्तनान्तर्भागे गमनम् । मध्यरात्र्युत्तरं १-३० समये, 'सिङ्गापुर एअर लाइन्स' - विमाने प्रवेशः । १-५० समये उड्डानम् ।

शुक्रवासरे प्रातः अस्माकं घटिकायन्त्रे ११-१५ समयः तदा हीथ्रो विमान-पत्तने (लन्दन) अवतरणं (लन्दन-समयः ६-४५) । प्रातः सूर्यदर्शनावसरे अस्मदीया घटी १२-०० (भारते मध्याह्ने) समयं दर्शयति । लन्दन-समयानुसारम् अपराह्णे १-०० पर्यन्तं हिथ्रो विमानपत्तने विश्रामः । भारते यदा सायं ५-३० समयः स्यात् तदानीम् आपराह्णिक (लन्दने) एकवादनसमये द्वा-विमानेन लन्दन-न्यूयॉर्क-प्रवासारम्भः । अयं द्वितीयाध्यायः पश्चिम-गोलार्ध-प्रवासस्य ।

हीथ्रो - विमानपत्तने प्रचंड - विस्तारे केवलं चतुर्थ-श्रेणी-सेवकाः भारतीयाः दृश्यन्ते । स्वच्छताकर्मणि (भङ्गी) नियुक्ताः । आरक्षक (पोलिस)-दले एकः सिक्ख - सरदारजी दृष्टः । अत्रैव मया वृत्तपत्र - क्रयार्थं प्रथम-डॉलर-द्रव्यं व्ययीकृतम् । एक-डॉलर-व्ययेन वृत्तपत्र-त्रय-क्रयः । भारतवर्ष-विषये एकमपि अक्षरं तत्र नासीत् । केवलं पाकिस्तान - शीर्षक - वार्तायां गावस्करः क्रिकेट स्पर्धा-त्रयं (३-०) जेष्यति इति सूचितम् ।

लन्दन-न्यूयॉर्क-प्रवासः नव-घण्टा-पर्यन्तं नितान्तं मानस-पीडाकरः सिद्धः । खाद्यपेयादिक - प्राचुर्ये, सुखासने चित्रपटादिके सत्यपि प्रतिघण्टा-मेलपञ्चशती - वेगेन मेघ - मण्डलोपरि धावति विमाने प्रदीर्घकालावधि निष्क्रिया स्थितिः कष्टप्रदा एव अनुभूता । अगतिकत्वात् तत् सर्वं सोढव्यम एव भवति । न्यूयॉर्कस्थे केनेडी - विमानपत्तने (अमेरिकासमयेन) सायं ३-३० समये अवतरणम् । भारतसमये तदानीं मध्यरात्र्युत्तरं २ वादन-समये सर्वेषां सुखस्वापः । शुक्रवासरस्थाने शनिः । १२ स्थाने १३-१०-८४ । न्यूयॉर्क-फिलाडेल्फिया-प्रवासः घण्टा-चतुष्टयं बस-यानेन सुखकरः ।

'पेन सेण्टर इन्' - नामके २२ भूमिक-हॉटेल-मध्ये षोडशे भूतरे १४ क्रम - प्रकोष्ठे निवासः । मया सह पं. ओगेटि परीक्षित् - शर्मा सहनिवासी । निवास - शुल्कं द्वयस्य कृते प्रतिदिनं डॉलर ६८ । एकस्य तु डॉलर ६२ + १० % करः । भोजनार्थम् एकवारं डॉलर १० तः २० पर्यन्तम् ।

स्नानगृहे 'बृहती' जलेन नैव प्रक्षालनीया इति भीतिः निराधारा सिद्धा । मदीयं स्नानाह्निकं, वस्त्रप्रक्षालनं, मालपट्टे चन्दनलेपनं सर्वं सर्वं यथेच्छं सुखं प्रचलति । प्रातराशसमयः (कॉण्टिनेण्टल ब्रेक् फास्ट) ७-३० तः ८ । तदानीं सन्त्राफल-रसः, नवनीतं-ब्रेड, दुग्धं, कॉफी . . . सर्वं सर्वम् उदरपूरं लभ्यते । तत्र सेविका वृद्धा (७५) मातृ-सहजेन वात्सल्येन सर्वं सानन्दं वितरति । यू आर ब्यूटिफुल् ऍण्ड फाइन, आय् विल् सर्व्ह व्हॉटेवर यू लाइक्; नो प्रॉब्लेम् इति सततं वदन्ती गतभर्तृका (नचिरमेव पतिनिधनम्) चपलतया सर्वत्र संचरन्ती वात्सल्येन सर्वप्रिया ।

फिलाडेल्फिया अमेरिका - राष्ट्रे पञ्चमक्रमाङ्किता विशाला नगरी एकतः चत्वारिंशत् पर्यन्तं छेदमार्गेषु विभक्ता भव्यप्रासादा ऐतिहासिकी इयं नगरी । प्रतिपदं बार, रेस्टॉरन्ट, हॉटेल, पीझा, कॉफी शॉप इ. । सर्वत्र भर्जित - गोमांस - दर्शनं अत्र भक्षणं, पानं दूरे अस्तु श्वसनम् अपि गच्छतां मार्गेण महते कष्टाय अनुभूयते । परं दुग्धं, दधि, नवनीतं चीजं (आमिक्षा) फलानि विविध-प्रकारक (कॉर्नफ्लेक्स) लाजाः शाकाहारिजनानाम् उदरं न कदापि रिक्तं स्थापयन्ति । केवलं व्ययः पञ्च-दश-गुणितः । भारतवर्षे यद् यद् वस्तु रूप्यकं दत्वा लभ्यते तस्य कृते अत्र डॉलर (५, १०, ११, १२, १५) दातव्यं भवति । जीवनम् अतीव महार्घम् । बस-यानसेवा सुखकारिणी आदर्शा । .८५ सेण्ट् (दशरूप्यकं) न्यूनातिन्यूनम् प्रवासपत्र-शुल्कम् । शैत्यं तावदधिकं नास्ति । अमेरिकादेशे बहुत्र हिमपातः प्रारब्धः सूर्यदर्शनं क्वचित्कम् ।

षष्ठ-विश्व-संस्कृत-सम्मेलनविषये वाक्यमात्रं लेखनीयं चेत् महती निराशा भ्रमजाल-निरासः च । सर्वा दुर्व्यवस्था । बिन्दुमात्रं जलम् अपि दुर्लभं सम्मेलन - स्थले । इस्कॉन-हरे कृष्ण - संचालकैः शाकाहारि - भोजनं सर्व-दिनेषु प्रसादत्वेन सम्मेलन - स्थानम् आगत्य वितरितुं कृता प्रार्थना सम्मेलन-संयोजकैः तिरस्कृता। 'संपत्-समृद्धि-शीलानां मानसेतु दरिद्रता ।' —इति शारदा-दैनिके मुखपृष्ठे मया कठोर-टीका कृता । तेन गु. डॉ. रा. ना. दाण्डेकर-सहिताः बहवः रुष्टाः । किं भवेद् विश्वबन्धुत्वस्य? इति भीत्या। परं पत्रकारस्य कर्तव्यं यथार्थं-वृत्त-प्रकाशनम् । तन्मया कृतम् । अस्तु । 'शारदा'-साहसेन सर्वे विस्मिताः । इदं संस्कृतेतिहासे अभूतपूर्वम् अशक्य-संभवं च इति बहुभिः प्रशंसितम् । स्वयं गु. डॉ. दाण्डेकरसदृशैः अपि । सुफलीभूतं 'शारदा'-साहसम् । तेन सत्यं धन्योऽहम् ।

भावि-विश्व-सम्मेलनं 'लायडन' - नगरे हॉलण्ड - राष्ट्रे । तदा श्री. -सौ. मराठे-दम्पती-यात्रा तत्र निश्चयेन भवतु । वर्षत्रयं सिद्धता कर्तव्या । सर्वेभ्यः परिचितेभ्यः नमो नमः । आयुष्मते स-सौ. सीमाकाय मकरन्दाय बण्डोपन्ताय च स्वस्ति ।

भवदीयः

वसन्तशर्मा

शारदा – २६ : ३ पञ्जीकृत-क्रमाङ्कः पीएनसीडब्ल्यू १०७ पूर्वमूल्यं विना प्रेषा अनुज्ञा-क्र.७१ पुणें ३० पृथक्करणकार्यालये समर्पितम् १०-१-१९८५



पुण्यपत्तन श्रीसहस्रबुद्धे-समाधि-मन्दिरे प. पू. श्रीश्रङ्गेरी-शारदापीठाधीश्वरैः प्रसादानुगृहीतः पू. दिगम्बरदासमहाराजः, शारदाकाराश्च ।

पुणे श्रीबाबामहाराज सहस्रबुद्धे समाधि-मन्दिरे वैदिक-सनातन-धर्म-रक्षणार्थं प्रवर्तिता दिनचर्या

१) ऋग्वेद - दशग्रन्थ - पारायणम् (प्रतिमासं षड्वारम्)
२) रुद्रजपः लघुरुद्रपाठः ।
३) सप्तशती - संपुटितः पाठः ।
४) गायत्री - सहस्रजपानुष्ठानम्
५) चतुर्दश - प्रणवयुक्त - महामृत्युंजय - सहस्र - जपः ।
६) श्रीमद्भागवत - पारायणम् । (प्रतिमासम् एकम्)
७) वाल्मीकि - रामायण - पारायणम् । (प्रतिमासम् एकम्)
८) श्रीमद्गुरुचरित्र - पारायणम् । (प्रतिमासं सप्ताह - चतुष्कम्)
९) श्रीगुरुलीलामृतम् । (प्रतिमासं सप्ताह - चतुष्कम्)
१०) श्रीनवनाथ-ग्रन्थ-पाठः । (मासिकं पारायण - चतुष्कम्)
११) सायं ४ तः ५ प्रवचनम् । 'ज्ञानेश्वरी' परिसमाप्ता संप्रति अनुभवामृतम्

डेरवण (चिपळूण) श्रीशिव - समर्थ - मन्दिरे यज्ञ-संस्था-रक्षकं विराट् यागानुष्ठानम् ।

(दि. २५ डिसेम्बर ८४ तः १ जानेवारी ८५)

१) अयुतचण्डी ।
२) अतिरुद्र - स्वाहाकारः ।
३) अष्टोत्तरशत - भागवत - पारायणम् एकं - दशम - स्कन्ध - हवनम् ।
४) वाल्मीकि-रामायण-पारायण-पञ्चकम् एकं सुन्दर-काण्ड-हवनम् ।
५) लघु - विष्णु - यागः । (१४४ पवमानपाठाः, १२ पाठ - हवनम् ।)
६) लघु - सौर - पाठाः (१२ पाठ - हवनम् ।)
७) लक्ष - (मोदक) गणेश - यागः ।
८) श्रीसूक्त - यागः । (दशसहस्रपाठाः, सहस्रपाठहवनम् ।)
९) श्रीदेवीसूक्तयागः । (दश-सहस्र-पाठाः, सहस्र-पाठ-हवनम् ।)

* दर्शनेच्छुभिः १ डिसेम्बर ८४ पूर्वं स्वीयं नामाङ्कनं कर्तव्यम् ।

कार्यवर्शी, श्रीशिव-समर्थ-मन्दिरम्, डेरवण(चिपळूण, रत्नागिरी)महाराष्ट्र

विट्ठलराव जोशी धर्मादाय - न्यासः । श्रीसन्तसीतारामबुवा वालावलकर धर्मादाय-न्यासः

संपादकः मुद्रकः प्रकाशकः स्वामी – पं. वसन्त अनन्त गाडगीळ बी.ए.बी.एड्. साहित्य-त्नशारद (पुण दूरवाणी — ५२१२४)
मुद्रण-स्थलम् — शारदा-मुद्रण-सिद्धि-मन्दिरम् पुणे १६ दै. सागर-मुद्रणालयः, चिपळूण
प्रकाशन-स्थलम् — श्रीशिव - समर्थ - मन्दिरम्, डेरवण (चिपळूण, रत्नागिरी) शारदा. २ झेलम, पत्रकारनगरी, पुणे ४११ ०१६